**संस्कृत विभाग**

# देवार्चना

## ''गायत्री स्तोत्रम्''

**श्रीदेव उवाच :—**

रूपादितत्व सहितां गायत्रीं परमाक्षरीम्।
चतुर्भूजां शशिकलां जटाजूट समन्विताम् ॥१॥
ऋक्सामयजुरासीनां प्रफुल्लपङ्कजेक्षणाम्।
पञ्चाशद्वर्णग्रथितां मालाद्योतितहृत्स्थलाम् ॥२॥
दिव्यगन्धप्रलिप्ताङ्गीं शुक्लवस्त्रपरिच्छदाम्।
शुक्लपद्मसमासीनां शुक्लवस्त्रोत्तरीयिणीम् ॥३॥
यथा सन्ध्यात्रयं नित्यं प्राणायामत्रयं तथा।
प्रणवत्रयसंयुक्ता गायत्री त्रिपदा तथा ॥४॥
पञ्चाशद्वर्णसंयुक्तं गायत्र्या निर्म्मितं वपुः।
आधारपद्ममध्यस्था विद्युत्पुञ्जप्रदीपिका ॥५॥
महापद्मवनमयी महापापविमोचनी।
महापुण्यमयी नित्या सच्चिदानन्दरूपिणी ॥६॥
गायत्री पातु वो नित्या ह्यशेषपापनाशिनी।
गायत्री अजपा विद्या प्रणवं भूर्भुवःस्वरः ॥७॥
ततः प्रणवमुद्धृत्य सुमेरुं सेतुरूपकम्।
ॐ तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि
धियो यो नः प्रचोदयात् ॐ ॥८॥
प्रणवं प्रजपेद्धीमान् पापोच्चाटनकर्म्माणि
प्रणवत्रयसंयुक्ता ब्राह्मणेषु प्रकीर्त्तिता ॥९॥
क्षत्रादौ परमेशानि सर्व्वत्र प्रणवद्वयम्।
त्रिपदा नाम गायत्री ब्रह्मविद्या पुरातनी ॥१०॥
गायत्री बहुरूपा च त्रिसन्ध्यं ध्यानमेव च।

**यथा :—**

प्रातरादित्यसङ्काशां चतुर्ब्बाहुसमन्विताम्।
हंसासनसमासीनां ऋग्वेदे समुदाहृताम् ॥१॥
मध्याह्ने चन्द्रसंकाशां गरुड़ासनसंस्थिताम्।
चतुर्भुजां कृष्णवर्णां विकचोत्पलधारिणीम् ॥२॥
वृषासनसमासीनां चतुर्ब्बाहुसमान्विताम्।
सायाह्ने वरदां घोरां प्रतिवक्त्रे त्रिलोचनाम् ॥३॥

**श्रीदेव उवाच :—**

यस्मादागमनं तस्यास्तत्रैव गमनं प्रिये।
यत्र तिष्ठति गायत्री तत्रैव आत्मनः स्थितिः ॥
यथा विष्णुस्तथा आत्मा गायत्री सहिता तथा।
यथात्मा च तथा रुद्र आत्मा ब्रह्मसमन्विता ॥

—इति गायत्रीतन्त्रम्
(गायत्रीस्तोत्रम् समाप्तम्)

### गायत्री-माहात्म्यम्

गायत्री साक्षात् परमब्रह्मरूपिणी। ऋषयः आदौ गायत्र्या ब्रह्मोद्बोधम् प्रकुर्वन्ति। अतः सा ब्रह्म विद्या। यतः गायत्र्याः आगमनम् तत्रैव तस्याः निर्गमनम् इति श्रुयते। यत्र गायत्र्याः अवस्थितिः तत्रैव आत्मनोहपि निर्वाणम्। गायत्र्याः सम्मिलितात्मा हि विष्णुः, रूद्रः तथा ब्रह्मा इति शास्त्र-सद्धिान्तः। गायत्री ब्रह्माणः, विष्णोः शिवस्य च अन्तर्गुहायाम् विराजते, अतः गायत्री सर्वव्यापिनी। गायत्री महाविन्दु स्वरूपा। सा खलु सुषुम्ना-मध्ये अन्तःशक्तिरूपेण विराजते। गायत्री साधनात् जनाः परब्रह्मसुखम् प्राप्नुवन्ति।

**—श्रीश्रीमाँ**

**संस्कृत अनुवाद—अध्यापक श्रीउदय बन्दोपाध्याय**

